रत्नमाला ॥ दुर्गा । यथा,—
“प्रभाप्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्क-
मालिनी ।”
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
“रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥”
इति मार्कण्डेये देवीमाहात्म्ये ५ अध्यायः ॥
(प्रभातकालः । यथा, विष्णुपुराणे । १ ।५।३६ ।
“ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याऽभि-
धीयते ॥”)

ज्योत्स्नाप्रियः, पुं, (ज्योत्स्ना प्रियाऽस्य ।) चकोरः । इति हेमचन्द्रः ॥

ज्योत्स्नावृक्षः, पुं, (ज्योत्स्नाया दीपधारण वृक्ष इव ।) दीपाधारः । इति त्रिकाण्डशेषः ॥

ज्योत्स्नी, स्त्री, (ज्योत्स्ना अस्त्यस्या इत्यण् ङीप् च । संज्ञापूर्ब्बकस्य विधेरनित्यत्वान्न वृद्धिः ।) चन्द्रिकायुक्ता रात्रिः । ज्योत्स्नारात्रिरिति ख्याता । पटोलिका । इत्यमरः ।२ । ४ । ११८॥ झिङ्गा इति भाषा ॥ रेणुकानाम गन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

ज्यौतिषिकः, पुं, (ज्योतिषं ज्योतिषशास्त्रमधीते वेद वा इति ठक् वृद्धिश्च ।) दैवज्ञः । इत्यमरः । २ । ८ । १४ ॥

ज्यौत्स्नः, त्रि, (ज्योत्स्नया अन्वितः । इत्यण् ।) दीप्तः । ज्योत्स्नायुक्तः ॥

ज्यौत्स्निका, स्त्री, (ज्योत्स्ना अस्त्यस्या इति ठक् पूर्ब्बवृद्धिष्टाप् च ।) ज्योत्स्नान्विता निशा । इति शब्दरत्नावली ॥

ज्यौत्स्नी, स्त्री, (ज्योत्स्ना पूर्णचन्द्रचन्द्रिका अस्त्यस्याः इत्यण् पूर्ब्बवृद्धिः ङीप् च ।) पूर्णिमायुक्तरात्रिः । इति हेमचन्द्रः ॥ ज्योत्स्नी । इत्यमरटीकायां रायमुकुटः ॥

ज्रि, अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां परं सकं-अनिट् ।) रेफोपधः । ज्रयति शत्रुं बली । इति दुर्गादासः ॥

ज्री, गि कि ज्याने । गतवयोभाव इति यावत् । इति कविकल्पद्रुमः ॥ (क्र्यां-चुरां पक्षे भ्वां-परं-अकं-अनिट् ।) गि, ज्रीणाति ज्रीणः ज्रीणिः । कि, ज्राययति ज्रयति । गिकाभ्यामेव पाक्षिकचुरादित्वे सिद्धे कि पाठो भ्वादित्वार्थः । इति दुर्गादासः ॥

ज्वर, म रोगे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ज्वरति जनो धातुवैषम्यात् । म, ज्वरयति । इति दुर्गादासः ॥

ज्वरः, पुं, (ज्वरति जीर्णो भवत्यनेन । ज्वर+करणे घञ् भावे घञ् वा । संज्ञापूर्ब्बकत्वात् वृद्ध्यभावः ।) ज्वरणम् । स्वनामख्यातरोगः । तत्पर्य्यायः । जूर्त्तिः २ । इत्यमरः । ३ । २ । ३८ ॥ ज्वरिः ३ आतङ्कः ४ रोगश्रेष्ठः ५ महागदः ६ । इति राजनिर्घण्टः ॥ तापकः ७ सन्तापः ८ । इति शब्दरत्नावली ॥ * ॥

तस्योत्पत्तिर्यथा,—
“कालाग्निरुद्रः कोपेन चिक्षेप ज्वरमुल्वणम् ।
बभूवुर्थादवाः सर्ब्बे ज्वराक्रान्ता हरिं विना ॥
तं दृष्ट्वा भगवान् कृष्णः ससर्ज्ज वैष्णवं ज्वरम् ।
तं चिक्षेप ज्वरं हन्तुं माहेशं रणमूर्द्धनि ॥” * ॥
माहेशज्वराकारो यथा,—
“जनकः सर्ब्बरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव विकृताकृतिः ॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥” * ॥
तस्य भेदाः ।
“वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥”
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
जातिभेदे ज्वरभेदो यथा, हरिवंशे ।
श्रीकृष्ण उवाच ।
“शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि ।
सर्ब्बजातिषु विन्यस्तस्तथा स्थावरजङ्गमे ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसि ।
चतुष्पादान् भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते ।
त्रिधाभूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वर ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।
एकान्ततश्चतुर्भागः खोरकश्च चतुर्थकः ॥
मानुषेष्वथ खेदाय वस त्वं प्रविभज्य वै ।
जातिष्वथावशेषासु निवस त्वं शृणुष्व मे ॥”
अस्यार्थः । “मानुषेषु यस्तृतीयो भागः तस्य चतुर्भागं कृत्वा एकांशेन पक्षिषु वस द्वितीयेन एकान्ता देवास्तेषु तृतीयांशः खोरकः चतुर्थांशेन मानुषेषु वस ॥”
“वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः ।
पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च ॥”
आतुर्य्यं निःसारता ॥
“पद्मिनीषु हिमो भूत्वा पृथिव्यामपि चोषरः ।
अपां तु नीलिकां विद्यात् शिखोद्भेदश्च बर्हिणाम् ॥
गैरिकः पर्ब्बतेष्वेव मत्प्रसादाद्भविष्यसि ।
गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि ॥
एवं विविधरूपेण भविष्यसि महीतले ।
दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि ॥
ऋते देवमनुष्यांश्च नान्यस्त्वां विषहिष्यति ॥”
तस्य गारुडोक्तनिदानादिर्यथा,—
धन्वन्तरिरुवाच ।
“वक्ष्ये ज्वरनिदानं हि सर्ब्बज्वरविबुद्धये ।
ज्वरो रोगपतिः पाप्मा मृत्युराजोऽशनोऽन्तकः ॥
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्द्ध्वनयनोद्भवः ।
तत्सन्तापो मोहमयः सन्तापात्मापचारजः ॥
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ।
पाकलो गजेष्वभितापो वाजिष्वलर्कः कुक्कुरेषु ।
इन्द्रमदो जलदेऽम्बु नीलिका ज्योतिरोषधिषु
भूम्यामूषरो नाम ॥ * ॥
“हृल्लासच्छर्द्दनं कासः स्तम्भः शैत्यं त्वगादिषु ।
अङ्गेषु शीतपिड़कामाश्चोदर्दः कफोद्भवे ॥
काले यथास्वं सर्ब्बेषां प्रवृत्तिर्वृद्धिरेव वा ।
निदानोक्तानुपशयो विपरीतोपशायिता ॥
अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च ।
हृद्दाहश्च विपाकश्च तन्द्रा चालस्यमेव च ॥
वह्निर्विसर्गविलया दोषाणामप्रवर्त्तनम् ।
लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं मुखम् ॥
यच्च सुप्त गुरुत्वञ्च गात्राणां बहुमूत्रता ।
न विजीर्णा न चाग्लानिर्ज्वरस्यामस्य लक्षणम् ॥
क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥ * ॥
यथास्वलिङ्गं संसर्गे ज्वरसंसर्गजोऽपि वा ।
शिरोऽर्त्तिमूर्च्छावमिदेहदाह-
कण्ठास्यशोषारुचिपर्ब्बभेदाः ।
उन्निद्रता संभ्रमरोमहर्षा
जृम्भातिवाक्त्वं पवनात् सपित्तात् ॥ * ॥
तापहान्यरुचिपर्ब्बशिरोरुक्-
पीनसश्वसनकासविबन्धाः ।
शीतजाड्यतिमिरभ्रमितन्द्राः
श्लेष्मवातजनितज्वरलिङ्गम् ॥ * ॥
शीतस्तम्भस्वेददाहव्यवस्था-
तृष्णाकासश्लेष्मपित्तप्रवृत्तिः ।
मोहस्तन्द्रालिप्ततिक्तास्यता च
ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य ॥ * ॥
सर्ब्बजो लक्षणैः सर्ब्बैर्दाहोऽत्र च मुहुर्म्मुहुः ।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा ।
गीतनर्त्तनहास्यादिप्रकृतेहाप्रवर्त्तनम् ॥
साश्रुणी कलुषे रक्ते भग्ने लुलितपक्ष्मणी ।
अक्षिणी पिण्डिकापार्श्वमूर्द्धपर्ब्बास्थिरुग्भ्रमः ॥
सस्वनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा ।
परिदग्धा खरा जिह्वा गुरुस्रस्ताङ्गसन्निभा ॥
रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिरुट् ।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ॥
हृद्व्यथा मलसंसर्गः प्रवृत्तिर्वाल्पशोऽति वा ।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ॥
वायुना कफरुद्धेन पित्तमन्तःसुपीड़ितम् ।
अवाप्यित्वाच्च सौक्ष्म्याच्च बहिर्म्मार्गं प्रपद्यते ॥
तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे ।
दोषे विरुद्धे नष्टेऽग्नौ सर्ब्बसंपूर्णलक्षणः ॥
असाध्यः सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा ।
अन्यच्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम् ॥
त्वचि कोष्ठे च वा दाहं विदधाति पुरोऽनु वा ।
तद्वद्वातकफौ शीतं दाहादिर्दुस्तरस्तयोः ॥
शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ।
शीते शान्तेऽथ मूर्च्छा मदस्तृष्णा च जायते ॥
दाहादौ पुनरन्ते स्युस्तन्द्राखेदवमिक्रमाः ॥ * ॥
आगन्तुरभिघाताभिषङ्गशापाभिचारतः ॥
चतुर्द्धा तु क्षतच्छेददाहाद्यैरभिघातजः । * ।
श्रमाच्च तस्मिन् पवनः प्रायो रक्तं प्रदूषयन् ॥
सव्यथाशोफवैवर्ण्यं सरुजं कुरुते ज्वरम् ।